श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीगोपालविंशतिः ॥

*This document* has been prepared by*

**Sunder Kidambi**

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

# ॥ श्रीगोपालविंशतिः ॥

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

वन्दे बृदावन चरं वल्लवी जन वल्लभम्।
जयन्ती संभवं धाम वैजयन्ती विभूषणम्॥ १ ॥

वाचं निजाङ्क रसिकां प्रसमीक्षमाणो
वक्त्रारविन्द विनिवेशित पाञ्चजन्यः।
वर्ण त्रिकोण रुचिरे वर पुण्डरीके
बद्धासनो जयति वल्लव चक्रवर्ती॥ २ ॥

आम्नाय गन्धि रुदित स्फुरिताधरोष्ठम्
आस्राविलेक्षणमनुक्षण मन्दहासम्।
गोपाल डिम्भ वपुषं कुहना जनन्याः
प्राण स्तनन्धयमवैमि परं पुमांसम्॥ ३ ॥

आविर्भवत्वनिभृताभरणं पुरस्तात्
आकुञ्चितैक चरणं निभृतान्य पादम्।
दध्ना निमन्थ मुखरेण निबद्ध ताळं
नाथस्य नन्द भवने नवनीत नाट्यम्॥ ४ ॥

हर्तुं कुम्भे विनिहित करः स्वादु हैयङ्गवीनं
दृष्ट्वा दाम ग्रहण चटुलां मातरं जात रोषाम्।
पायादीषत् प्रचलितपदो नापगच्छन् न तिष्ठन्
मिथ्यागोपः सपदि नयने मीलयन् विश्व गोप्ता॥ ५ ॥

व्रज योषिदपाङ्गवेधनीयं मधुराभाग्यमनन्य भोग्यमीडे।
वसुदेववधू स्तनन्धयं तत् किमपि ब्रह्म किशोरभाव दृश्यम्॥ ६ ॥

परिवर्तित कन्धरं भयेन स्मित फुल्लाधर पल्लवं स्मरामि।
विटपित्व निरासकं कयोश्चित् विपुलोलूखल कर्षकं कुमारम्॥ ७ ॥

निकटेषु निशामयामि नित्यं निगमान्तैरधुनाऽपि मृग्यमाणम्।
यमळार्जुन दृष्ट बाल केळिं यमुना साक्षिक यौवनं युवानम्॥ ८ ॥

पदवीमदवीयसीं विमुक्तेः अटवीसंपदमम्बुवाहयन्तीम्।
अरुणाधर साभिलाष वंशां करुणां कारण मानुषीं भजामि॥ ९ ॥

अनिमेष निषेवणीयमक्ष्णोः अजहद्यौवनमाविरस्तु चित्ते।
कलहायित कुन्तळं कलापैः करणोन्मादक विभ्रमं महो मे॥ १० ॥

अनुयायि मनोज्ञ वंश नाळैः अवतु स्पर्शित वल्लवीविमोहैः।
अनघ स्मित शीतळैरसौ माम् अनुकम्पा सरिदम्बुजैरपाङ्गैः॥ ११ ॥

अधराहित चारु वंश नाळाः मकुटालम्बि मयूर पिञ्छमालाः।
हरिनील शिला विभङ्ग नीलाः प्रतिभाः सन्तु ममान्तिम प्रयाणे॥ १२ ॥

अखिलानवलोकयामि कालान् महिळाधीन भुजान्तरस्य यूनः।
अभिलाष पदं व्रजाङ्गनानाम् अभिलापक्रम दूरमाभिरूप्यम्॥ १३ ॥

हृदि मुग्ध शिखण्ड मण्डनो लिखितः केन ममैष शिल्पिना।
मदनातुर वल्लवाङ्गनावदनाम्भोज दिवाकरो युवा॥ १४ ॥

महसे महिताय मौळिना विनतेनाञ्जलिमञ्जन त्विषे।
कलयामि विमुग्ध वल्लवीवलयाभाषित मञ्जु वेणवे॥ १५ ॥

जयति ललित वृत्तिं शिक्षितो वल्लवीनां
शिथिल वलय शिञ्जा शीतळैर्हस्त ताळैः।
अखिल भुवन रक्षा गोप वेषस्य विष्णोः
अधर मणिसुधायामंशवान् वंशनालः॥ १६ ॥

चित्राकल्पः श्रवसि कलयन् लाङ्गली कर्णपूरं
बर्होत्तंस स्फुरित चिकुरो बन्धुजीवं दधानः।

गुञ्जा बद्धामुरसि ललितां धारयन् हारयष्टिं
गोप स्त्रीणां जयति कितवः कोऽपि कौमारहारी॥ १७॥

लीलायष्टिं कर किसलये दक्षिणे न्यस्य धन्याम्
अंसे देव्याः पुळकरुचिरे सन्निविष्टान्य बाहुः।
मेघ श्यामो जयति ललितो मेखला दत्त वेणुः
गुञ्जापीड स्फुरित चिकुरो गोपकन्या भुजङ्गः॥ १८॥

प्रत्यालीढ स्थितिमधिगतां प्राप्त गाढाङ्कपालिं
पश्चादीषन्मिलित नयनां प्रेयसीं प्रेक्षमाणः।
भस्त्रा यन्त्र प्रणिहित करो भक्त जीवातुरव्यात्
वारि क्रीडा निबिड वसनो वल्लवी वल्लभो नः॥ १९॥

वासो हृत्वा दिनकर सुतासन्निधौ वल्लवीनां
लीलास्मेरो जयति ललितामास्थितः कुन्दशाखाम्।
सव्रीडाभिस्तदनु वसने ताभिरभ्यर्थ्यमाने
कामी कश्चित् कर कमलयोरञ्जलिं याचमानः॥ २०॥

इत्यनन्य मनसा विनिर्मितां वेङ्कटेश कविना स्तुतिं पठन्।
दिव्य वेणु रसिकं समीक्षते दैवतं किमपि यौवत प्रियम्॥ २१॥

॥ इति श्रीगोपालविंशतिः समाप्ता॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥